# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

### अध्याय १०

अथाब्रवीद्दिद्वजं रामः कथं ते भ्रातरो वने ।
कीदृशं तु तदा ब्रह्मंस्तपश्चेरुर्महाव्रताः ॥१॥

अगस्त्यस्त्वब्रवीत्तत्र रामं प्रयत मानसं ।
तांस्तान्धर्मविधींस्तत्र भ्रातरस्ते समाविशन् ॥२॥

कुम्भकर्णस्तदा यत्तो नित्यं धर्मपरायणः ।
तताप ग्रैष्मिके काले पञ्चस्वग्निष्ववस्थितः ॥३॥

वर्षे मेघोदकक्लिन्नो वीरासनमसेवत ।
नित्यं च शैशिरे काले जलमध्यप्रतिश्रयः ॥४॥

एवं वर्षसहस्राणि दश तस्यातिचक्रमुः ।
धर्मे प्रयतमानस्य सत्पथे निष्ठितस्य च ॥५॥

विभीषणस्तु धर्मात्मा नित्यं धर्मपरः शुचिः ।
पञ्चवर्षसहस्राणि पादेनैकेन तस्थिवान् ॥६॥

समाप्ते नियमे तस्य ननृतुश्चाप्सरोगणाः ।
पपात पुष्पवर्षं च क्षुभिताश्चापि देवताः ॥७॥

पञ्चवर्षसहस्राणि सूर्यं चैवान्ववर्तत ।
तस्थौ चोर्ध्वशिरो बाहुः स्वाध्यायधृतमानसः ॥८॥

एवं विभीषणस्यापि गतानि नियतात्मनः ।
दशवर्षसहस्राणि स्वर्गस्थस्येव नन्दने ॥९॥

दशवर्षसहस्रं तु निराहारो दशाननः ।
पूर्णे वर्षसहस्रे तु शिरश्चाग्नौ जुहाव सः ॥१०॥

एवं वर्षसहस्राणि नव तस्यातिचक्रमुः ।
शिरांसि नव चाप्यस्य प्रविष्टानि हुताशनम् ॥११॥

अथ वर्षसहस्रे तु दशमे दशमं शिरः ।
छेत्तुकामः स धर्मात्मा प्राप्तश्चात्र पितामहः ॥१२॥

पितामहस्तु सुप्रीतः सार्धं देवैरुपस्थितः ।
वत्स वत्स दशग्रीव प्रीतोऽस्मीत्यभ्यभाषत ॥१३॥

शीघ्रं वरय धर्मज्ञ वरो यस्तेऽभिकाङ्क्षितः ।
किं ते कामं करोम्यद्य न वृथा ते परिश्रमः ॥१४॥

ततोऽब्रवीद्दशग्रीवः प्रहृष्टेनान्तरात्मना ।
प्रणम्य शिरसा देवं हर्षगद्गदया गिरा ॥१५॥

भगवन्प्राणिनां नित्यं नान्यत्र मरणाद्भयम् ।
नास्ति मृत्युसमः शत्रुरमरत्वमतो वृणे ॥१६॥

सुपर्णनागयक्षाणां दैत्यदानवरक्षसाम् ।
अवध्यः स्यां प्रजाध्यक्ष देवतानां च शाश्वतम् ॥१७॥

न हि चिन्ता ममान्येषु प्राणिष्वमरपूजित ।
तृणभूता हि मे सर्वे प्राणिनो मानुषादयः ॥१८॥

एवमुक्तस्तु धर्मात्मा दशग्रीवेण रक्षसा ।
उवाच वचनं राम सह देवैः पितामहः ॥१९॥

भविष्यत्येवमेवैतत्तव राक्षसपुङ्गव ।
शृणु चापि वचो भूयः प्रीतस्येह शुभं मम ॥२०॥

हुतानि यानि शीर्षाणि पूर्वमग्नौ त्वयानघ ।
पुनस्तानि भविष्यन्ति तथैव तव राक्षस ॥२१॥

एवं पितामहोक्तस्य दशग्रीवस्य रक्षसः ।
अग्नौ हुतानि शीर्षाणि यानि तान्युत्थितानि वै ॥२२॥

एवमुक्त्वा तु तं राम दशग्रीवं प्रजापतिः ।
विभीषणमथोवाच वाक्यं लोकपितामहः ॥२३॥

विभीषण त्वया वत्स धर्मसंहितबुद्धिना ।
परितुष्टोऽस्मि धर्मज्ञ वरं वरय सुव्रत ॥२४॥

विभीषणस्तु धर्मात्मा वचनं प्राह साञ्जलिः ।
वृतः सर्वगुणैर्नित्यं चन्द्रमा इव रश्मिभिः ॥२५॥

भगवन्कृतकृत्योऽहं यन्मे लोकगुरुः स्वयम् ।

प्रीतो यदि त्वं दातव्यं वरं मे शृणु सुव्रत ॥ २६॥

या या मे जायते बुद्धिर्येषु येष्वाश्रमेष्विह ।
सा सा भवतु धर्मिष्ठा तं तं धर्मं च पालये ॥ २७॥

एष मे परमोदार वरः परमको मतः ।
न हि धर्माभिरक्तानां लोके किं चन दुर्लभम् ॥ २८॥

अथ प्रजापतिः प्रीतो विभीषणमुवाच ह ।
धर्मिष्ठस्त्वं यथा वत्स तथा चैतद्भविष्यति ॥ २९॥

यस्माद्राक्षसयोनौ ते जातस्यामित्रकर्षण ।
नाधर्मे जायते बुद्धिरमरत्वं ददामि ते ॥ ३०॥

कुम्भकर्णाय तु वरं प्रयच्छन्तमरिन्दम ।
प्रजापतिं सुराः सर्वे वाक्यं प्राञ्जलयोऽब्रुवन् ॥ ३१॥

न तावत्कुम्भकर्णाय प्रदातव्यो वरस्त्वया ।
जानीषे हि यथा लोकांस्त्रासयत्येष दुर्मतिः ॥ ३२॥

नन्दनेऽप्सरसः सप्त महेन्द्रानुचरा दश ।
अनेन भक्षिता ब्रह्मन्नृषयो मानुषास्तथा ॥ ३३॥

वरव्याजेन मोहोऽस्मै दीयताम् अमितप्रभ ।
लोकानां स्वस्ति चैव स्याद्भवेदस्य च संनतिः ॥ ३४॥

एवमुक्तः सुरैर्ब्रह्माचिन्तयत्पद्मसम्भवः ।
चिन्तिता चोपतस्थेऽस्य पार्श्वं देवी सरस्वती ॥ ३५॥

प्राञ्जलिः सा तु पर्श्वस्था प्राह वाक्यं सरस्वती ।
इयमस्म्यागता देवकिं कार्यं करवाण्यहम् ॥ ३६॥

प्रजापतिस्तु तां प्राप्तां प्राह वाक्यं सरस्वतीम् ।
वाणि त्वं राक्षसेन्द्रस्य भव या देवतेप्सिता ॥ ३७॥

तथेत्युक्त्वा प्रविष्टा सा प्रजापतिरथाब्रवीत् ।
कुम्भकर्ण महाबाहो वरं वरय यो मतः ॥ ३८॥

कुम्भकर्णस्तु तद्वाक्यं श्रुत्वा वचनमब्रवीत् ।
स्वप्तुं वर्षाण्यनेकानि देवदेव ममेप्सितम् ॥ ३९॥

एवमस्त्विति तं चोक्त्वा सह देवैः पितामहः ।
देवी सरस्वती चैवमुक्त्वा तं प्रययौ दिवम् ॥ ४०॥

कुम्भकर्णस्तु दुष्टात्मा चिन्तयामास दुःखितः ।
कीदृशं किं न्विदं वाक्यं ममाद्य वदनाच्च्युतम् ॥ ४१॥

एवं लब्धवराः सर्वे भ्रातरो दीप्ततेजसः ।
श्लेष्मातकवनं गत्वा तत्र ते न्यवसन्सुखम् ॥ ४२॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com